दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-76 | 1 | जनवरी 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णपञ्चमी
पौषः 22 प्रविष्टांशः मङ्गलमयः भवेत्

2 निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षणप्रक्रियायाः अनन्तरं राज्यस्य प्रारूप मतदातृ-सूचिः प्रकाशिता

3 सूचनाप्रौद्योगिक्याः उपयोगे हिमाचलप्रदेशः देशस्य प्रथमक्रमाङ्कस्य राज्यम् अभवत्: मुख्यमन्त्री सुक्खुः

5 इंडोनेशियाराष्ट्रस्य बलीप्रान्तस्य द्वीपान्तर-संस्कृतप्रतिष्ठानस्य मार्कण्डेयगुरुकुले संस्कृताध्ययनकार्यक्रमाङ्गतया संस्कृताध्ययनकेन्द्रं समुद्घाटितम्

## प्रधानमन्त्री नरेन्द्रमोदी

आन्ध्रप्रदेशस्य विशाख-रिफाइनरी इत्यत्र हिन्दुस्तान्-पेट्रोलियम-कापरिशन्-लिमिटेड् इत्यस्य अवशिष्ट-उन्नयन-सौकर्यस्य सफलतया आरम्भस्य प्रशंसाम् अकरोत् । सामाजिके अन्तर्जालीये पटले पेट्रोलियम-प्राकृतिक-ईधन-मन्त्रिणः हरदीप सिङ्ग-पुरी-वर्यस्य सन्देशं विनिमयी कुर्वन्, प्रधानमन्त्री अवदत् यत्, एषा अत्याधुनिक सुविधा आत्मानिर्भरभारतस्य दृष्ट्या ऊर्जा-स्वातन्त्र्यं वर्धयितुं राष्ट्रस्य प्रयत्नेषु गतिं जनयिष्यति ।

## ग्रामीणाभिवृद्धि-परिवेशे ऐतिहासिकं, विकसितभारतस्य आधारं च भविष्यति जी-राम-जी- मुख्यमन्त्री आदित्यनाथयोगी

उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगी आदित्यनाथेन प्रतिपादितम् यत् पञ्चविंशत्यधिक द्विसहस्र इत्यस्य विकसितभारत्-जी राम्-जी अधिनियमः, देशस्य ग्रामीणाभिवृद्धि-परिवेशे ऐतिहासिकं, विकसितभारतस्य आधारं च भविष्यति। लोकभवने षड्विंशत्यधिक-विद्वसहस्रतम वर्षस्य प्रथममन्त्री मण्डलीय-सभायाः अनन्तरं विशेष-वार्ताहर-सम्मेलनम् संबोधयन्, लखनऊ-नगरे योगी आदित्यनाथः केन्द्रसर्वकारस्य निर्णयस्य प्रशंसाम् अकरोत्, तथा च उक्तवान् यत् अयं पारदर्शक प्रक्रियाम् सुनिश्चेतुं, वृत्यावसरान् निर्मातुं, प्रत्याभूतिं प्रदातुं, ग्रामीणक्षेत्रेषु स्थायी-सम्पत्तिं निर्मातुं च महत्त्वपूर्णः अधिनियमः अस्ति, येन ग्रामीण-आधारभूतसंरचनाः वर्धते।

## बाङ्ग्लादेशे उपस्करादि-द्रव्य-आपणस्य स्वामी चत्वारिंशत् वर्षीयः हिन्दु-पुरुषः मारितः

बाङ्ग्लादेशस्य नरसिङ्ङ्डी-नगरे, अज्ञातैः आक्रमणकारिभिः तीक्ष्ण-शस्त्र प्रहारेण उपस्करादि-द्रव्य-आपणस्य स्वामी चत्वारिंशत् वर्षीयः हिन्दु-पुरुषः मारितः। नरसिङ्ङ्डी-मण्डले उपस्कर-व्यापारिणः मोनी-चक्रवर्ती-इत्यस्य हत्यया सम्पूर्ण बाङ्ग्लादेशे भयम् क्रोधं च वर्धितमस्ति। गतसप्ताहेषु हिन्दु समुदायस्य जनानां हत्या चिन्तास्पद-श्रृङ्खलायां तस्य मृत्युः अभवत्। मोनी इत्यस्य हत्या अल्पे काले एव चतुर्थम् एतादृशम् प्रकरणम् अस्ति, येन बाङ्ग्लादेशे सार्वजनिकसुरक्षायाः, अल्पसङ्ख्यक संरक्षणस्य, विधि-व्यवस्थायाः च स्थित्याः विषये गम्भीरा चिन्ता प्रकटिता।

## केन्द्रीय-माध्यमिक शिक्षा-परिषदा परीक्षा-सम्बद्ध-कष्टं निवारणाय दशमी तः द्वादशी कक्षायाः परीक्षार्थिनां कृते मनोसामाजिक-परामर्श-समर्थनम् आरब्धम्




**हिमसंस्कृतवार्ताः** - केन्द्रीय-माध्यमिक शिक्षा-परिषदा (सी. बी. एस्. ई.) इत्यनेन परीक्षा-सम्बद्ध-कष्टं निवारणाय छात्राणां कृते मनोसामाजिक-परामर्श-समर्थनम् आरब्धम्। दशमी तः द्वादशी कक्षायाः परीक्षार्थिनां कृते निःशुल्क-मनोसामाजिक परामर्श सेवायाः प्रथमः चरणः अस्मिन् वर्षे जून-मासस्य एक दिनाङ्कपर्यन्तं प्रचलिष्यति । अस्य उपक्रमस्य उद्देश्यं परीक्षा-सम्बद्ध-कष्टस्य, भावनात्मक स्वास्थ्यस्य च निवारणम् अस्ति, येन छात्राः आत्मविश्वासेन, सन्तुलनेन, मानसिक स्पष्टतया च फरवरी मासस्य सप्तदश-दिनाङ्कात् आरभमाणेषु अग्रिमपरीक्षायां सम्मिलितुं समर्थाः भवन्ति । छात्राः टोल-फ्री-सङ्ख्यां एकं अष्ट शून्यं शून्यं एक एक अष्ट शून्यं शून्यं चत्वारि इत्यत्र सम्पर्क कर्तुं शक्नुवन्ति तथा च इन्टराक्टिव्-वाइस-रिस्पान्स्-सिस्टम् इत्यस्य माध्यमेन हिन्दी-आङ्ग्ल-भाषयोः चतुर्विंशति होरासु सहयोगं प्राप्तुं शक्नुवन्ति ।

## शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन देशस्य पञ्च-शास्त्रीय-भाषाणां पञ्चपञ्चाशत् दुर्लभाः बहुमूल्याः च साहित्यिक-कृतयः लोकार्पिताः।



**हिमसंस्कृतवार्ताः** - शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन देशस्य पञ्च-शास्त्रीय-भाषाणां पञ्चपञ्चाशत् दुर्लभाः बहुमूल्याः च साहित्यिक कृतयः लोकार्पिताः। एतासु तमिळ, तेलुगु, मलयाळम, कन्नड, ओडिया भाषाः च सन्ति। पुस्तकानि केन्द्रीय-भारतीय-भाषा-समित्या प्रकाशितानि सन्ति । नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् श्रीप्रधानः अवदत् यत्, भारतीयभाषाः राष्ट्र समाजं च संयोजयन्ति ऐक्यं च कुर्वन्ति। सः अवदत् यत् सर्वाः भारतीय-भाषाः राष्ट्रभाषाः इव इति प्रधानमन्त्रिणा नरेन्द्रमोदिना अवधानं दत्तम्। श्रीप्रधानः अधोरेखितवान् यत् गतवर्षे सर्वकारेण पञ्च-अन्याभिः भारतीयभाषाभिः अपि प्राचीन-मूल-कारणाच्च शास्त्रीय-भाषारूपेण मान्यता प्रदत्ता। एतासु मराठी, तेलुगु, बङ्ग्ला, असमिया, पाली, प्राकृत च सन्ति।

## तिरुप्पारन कुंड्रम-पर्वत- स्थिते दीपथून स्तम्भे दीपप्रज्वलनस्य अनुमतिः प्रदत्ता मद्रासोच्चन्यायालयः ।

**हिमसंस्कृतवार्ताः** - मद्रासोच्च न्यायालयस्य मदुरै खण्डपीठेन तिरुप्पारन कुंड्रम-पर्वत- स्थिते दीपथून स्तम्भे दीपप्रज्वलनस्य अनुमति-प्रदानाय एकल-न्यायाधीशस्य आदेशः यथावत् प्रवर्तितः। न्यायमूर्तेः जी. जयचन्द्रनस्य न्यायमूर्तेः के. के. रामकृष्णनस्य च खण्डपीठेन उक्तं यत् यस्मिन् स्थाने दीपथून-नामकः प्रस्तर स्तम्भो वर्तते तत्र भगवतः सुब्रह्मण्यम स्वामिनः मन्दिरम् अस्ति। पीठेन प्रोक्तं यत् भारतीय पुरातत्व सर्वेक्षणस्य परामर्शस्य अनन्तरं तत्र दीपं प्रज्वालयिष्यते। न्यायालयेन उक्तं यत् तत्र उपस्थातुं जनानां सङ्ख्यायाः निर्धारणं कर्तुं शक्यते। याचिकाकर्ता निरञ्जन एस कुमारः अवदत् यत् तिरुप्पारन कुंड्रम-पर्वते दीपप्रज्वालनम् आवश्यकं वर्तते।

## सुभाषितम्

**गुणिनि गुणज्ञो रमते,**
**नागुणशीलस्य गुणिनि परितोषः।**
**अलिरेति वनात् कमलं,**
**न दर्दुरस्त्निवासोऽपि।।**
**(वल्लभदेवः- २५३)**

अर्थात्- गुण की परख रखने वाला गुणी को पाकर प्रसन्न हो जाता है, किन्तु निर्गुण व्यक्ति गुणवान से सन्तुष्ट नहीं होता। भ्रमर तो वन से कमल के पास चला आता है किन्तु मण्डूक जलाशय में कमल के अत्यन्त समीप होते हुए भी उसके समीप नहीं जाता।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## लक्ष्यसेनः मलेशिया ओपन सुपर-750 इति बैडमिंटन-स्पर्धामालिकायां पुरुषैकलवर्गस्य द्वितीयचक्रे प्रविष्टः



**हिमसंस्कृतवार्ताः** - भारतस्य बैडमिंटनक्रीडकः लक्ष्यसेनः मलेशियायाः कुआलालम्पुरे मलेशिया ओपन- सुपर-750 इति बैडमिंटन स्पर्धामालिकायां सिंगापुरस्य जिया हॅंग जेसन तेह इत्येनं पराजित्य पुरुषैकलवर्गे द्वितीयचक्रे प्रविष्टः

# हिमाचलप्रदेशस्य उच्चन्यायालयेन उक्तम्- आरक्षितवर्गीयस्य अभ्यर्थिनः सामान्यवर्गे स्थानान्तरणं न कर्तुं शक्यते



**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला ।** हिमाचलप्रदेशस्य उच्चन्यायालयेन सहायक-अभियन्ता (विद्युत्) नियुक्ति-प्रक्रियाम् आह्वयन्ती याचिका निरस्तीकृता। न्यायालयेन स्पष्टं यत् यदि कश्चन आरक्षितवर्गीयः अभ्यर्थीः चयनप्रक्रियायां कस्यापि स्तरस्य अपकर्षमानकस्य (शिथिलमानकस्य) लाभं गृह्णाति, तर्हि सः पश्चात् सामान्यवर्गीयासु रिक्तिषु समायोजयितुं न शक्यते। माननीया न्यायाधीशा ज्योत्सना रिवाल दुआ महोदया स्वन्यायालये अवदत् यत् अधुना विधिः पूर्णतया स्थापितः ये आरक्षितवर्गीयाः अभ्यर्थिनः आयुः, अनुभवः अथवा कट-ऑफ इत्यादिषु कस्यापि स्तरस्य शिथिलताया लाभं गृह्णन्ति, ते सामान्यवर्गीयरिक्तीनां कृते विचारणीयाः न भवन्ति।न्यायालयेन उक्तं यत् अभिलेखानुसारं याचिकाकर्त्री स्क्रीनिङ्ग-परीक्षायां ईडब्ल्यूएसवर्गस्य कृते निर्धारितेषु न्यूनाङ्केषु शिथिलताया लाभं प्राप्तवती आसीत्। अतः अस्मिन् स्तरे एव वर्गीय-अपकर्षलाभं गृहीत्वा सा पश्चात् सामान्यवर्गीय-आसनेषु स्थानान्तरयितुं न शक्यते स्म। एतद् प्रकरणं हिमाचलप्रदेश-लोकसेवा-आयोगेन वर्षे 2022 तमे विज्ञापितेषु सहायक-अभियन्ता (इलेक्ट्रिकल) इत्यस्य 76 पदेषु सम्बद्धः अस्ति। याचिकाकर्त्री आर्थिकरूपेण दुर्बलवर्गात् आसीत् या चयनप्रक्रियाम् आह्वानं कृतवती। तस्याः तर्कः आसीत् यत् अन्यः चयनितः अभ्यर्थी सामान्यवर्गे स्थानान्तरितव्यः आसीत्, यतः तस्य अङ्काः सामान्यवर्गस्य कट-ऑफ इत्यस्मात् अधिकाः आसन्। याचिकाकर्त्र्याः अभ्युपगमः आसीत् यत् यदि सा सामान्यवर्गे स्थाप्येत, तर्हि ईडब्ल्यूएसवर्गे एका रिक्तिः स्यात्, येन तस्याः चयनं सुनिश्चितं स्यात्।

## सर्वकारीयकर्मिणां सेवा-नियुक्तिविषये निर्णयः सुरक्षितः

हिमाचलप्रदेशस्य उच्चन्यायालये सर्वकारीय-कर्मचारी- नियुक्ति- सेवाशर्त- विधेयक– 2024 इत्यस्य विरुद्धं दत्तायाः याचिकायाः विषये वादः समाप्तः अभवत्। माननीयौ न्यायाधीशौ विवेकसिंहठाकुरः, न्यायाधीशः रोमेश वर्मा च, एतयोः खण्डपीठेन सर्वान् पक्षान् श्रुत्वा निर्णयः सुरक्षितः कृतः। सोमवासरे याचिकाकर्तॄणां पक्षे वरिष्ठ- अधिवक्ता सर्वकारस्य तर्कान् खण्डयन् न्यायालयम् अवदत् यत् अयं अधिनियमः संविधानस्थेषु अनुच्छेदेषु निहितानां प्रावधानानां विरुद्धम् अस्ति, अतः तं निरस्तुं प्रार्थना कृतवती। अस्मात् पूर्वं गतबुधवासरे महाधिवक्तृणा स्वपक्षः प्रस्तुतः कृतः। तेन उक्तं यत् अस्य अधिनियमस्य निर्माणस्य उद्देश्यं नियमितकर्मिणां तथा संविदाकर्मिणां भेदं कर्तुम् अस्ति। अस्मिन् अधिनियमे अनुबन्धसेवायाः कुत्रापि स्थानं न दत्तम्। ताजमोहम्मदप्रकरणे पारितस्य निर्णयस्य अनन्तरम् अयं अधिनियमः निर्मितः। न्यायालयेन द्वयोः अनुबन्धकर्मिणोः नियुक्तिदिनात् एव वित्तीयलाभदानस्य निर्णयः दत्तः आसीत्। उक्तं यत् अस्य लाभः तेषामपि प्राप्यते येषां नियुक्तयः आर एण्ड पी नियमेषु अनुसारं न कृताः आसन्। अस्य अधिनियमस्य पश्चात् सर्वकारः या नियुक्तिपत्राणि ददाति, तानि सर्वाणि नूतन-अधिनियमस्य अनुसारमेव सन्ति। हिमाचलप्रदेश-उच्चन्यायालये हिमाचलप्रदेश- सर्वकारीकर्मचारी- नियुक्ति- सेवाशर्तविधेयक– 2024 इत्यत् आह्वानं कृतम् अस्ति।

# शैक्षिकभ्रमणार्थं प्रस्थिताः "राज्यस्य बालकाः" एतेषां स्थलानां भ्रमणं करिष्यन्ति




**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः मङ्गलवासरे प्रातः मुख्यमन्त्रीसुख-आश्रययोजनायाः अन्तर्गतं हिमाचलप्रदेशसचिवालयात् राज्यस्य बाल- संरक्षणसंस्थासु (सीसीआई) सराहन-टुटीकण्डी- मशोबरास्थानेषु निवसन्तः "राज्यस्य बालकान्" विशेषशैक्षिक-अनुभवात्मक-भ्रमणाय प्रेषितवान्। मुख्यमन्त्री अस्मिन्नवसरे सर्वैः बालकैः सह संवादं कृत्वा भ्रमणस्य पूर्णतया आनन्दं प्राप्तुं प्रोत्साहितवान्। **क्रमशः... तृतीये पृष्ठे...**

# निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षणप्रक्रियायाः अनन्तरं राज्यस्य प्रारूप मतदातृ-सूचिः प्रकाशिता


**हिमसंस्कृतवार्ताः** - निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षण-प्रक्रियायाः अनन्तरं राज्यस्य प्रारूप मतदातृ-सूचिः प्रकाशिता। इतः पूर्वं प्रारूप मतदातृ-सूचेः प्रकाशनं विगते दिसम्बर-मासे एकत्रिंशे दिने निरिधारितम् आसीत्। उत्तर-प्रदेशस्य मुख्य निर्वाचनाधिकारी नवदीप ऋणवा अवदत् यत् अस्यां सूच्यां पञ्च-विंशत्यधिक-षड्पञ्चाशदुत्तर-पञ्च-पञ्चाशत्-लक्षाधिक द्वादशकोटि मतदातारः सम्मिलिताः सन्ति । अमुना उक्तं यत् आपत्तिं प्रस्तोतुं फरवरीमासस्य षष्ठो दिवसः अन्तिमावधिः वर्तते। उत्तर-प्रदेशे मार्चमासस्य षष्ठे दिने परिष्कृता संशोधिता अन्तिमा च मतदातृ-सूचिः प्रकाशयिष्यते। ततः परं मतदातृसूच्यां कथमपि परिष्कारं नैव करिष्यते।

## देशस्य अतिशयभागेषु सघन कुज्झटिका-कारणेन बहुत्र रेलसेवा दुष्प्रभाविता



देशस्य अतिशयभागेषु सघन कुज्झटिका-कारणेन बहुत्र रेलसेवा दुष्प्रभाविता। रेलविभागस्य अनुसारं दिल्ली सम्भागस्य सप्ततिः रेलयानानि निहाराच्छादनेन स्वल्पदृश्यता कारणेन च विलम्बेन प्रयान्ति। यात्रिणः अपि सञ्चेतिताः यत् रेलस्थानकं प्रति प्रस्थानात् पूर्व रेलयानानाम् प्रचलन स्थितिम् अवगच्छन्तु इति। ऋतु विभागेन अद्य मध्यप्रदेशे बिहारे च सघन-कुज्झटिकायाः ऑरेंज अलर्ट इति नारङ्गवर्णीया सञ्चेतना प्रसारिता अस्ति । ऋतु विभागेन उक्तं यत् आगानि द्वि-त्रिदिनेषु दिल्ल्यां हरियाणायां चण्डीगढे पञ्जाबे हिमाचलप्रदेशे बिहारे छत्तीसगढे आडिशायां राजस्थाने हिमालयीये पश्चिमबङ्गाले देशस्य पूर्वोत्तरभागे अपि द्रष्टुं शक्यते

# पूर्वकेन्द्रीयमन्त्री सुरेशकलमाड़ी वर्यस्य पुणेनगरे निधनम्



पूर्वकेन्द्रीयमन्त्री सुरेशकलमाड़ी पुणेनगरे ८२ वर्षे दीर्घकालं यावत् अस्वस्थतायाः अनन्तरं निधनं गतः। सः भारतीय-ओलम्पिक-सङ्घस्य अध्यक्षत्वेन अपि कार्यं कृतवान् । पूर्वप्रधानमन्त्री पी.वी. नरसिंहरावः । अनुभवी राजनेता कलमाड़ीमहोदयं बहुवारं संसदे पुणे-नगरस्य प्रतिनिधित्वं कृतवान्, दीर्घराजनैतिकजीवने च अनेकानि महत्त्वपूर्णानि पदस्थानानि अपि कृतवान् ।

# सूचनाप्रौद्योगिक्याः उपयोगे हिमाचलप्रदेशः देशस्य प्रथमक्रमाङ्कस्य राज्यम् अभवत्: मुख्यमन्त्री सुक्खुः




**हिमसंस्कृतवार्ताः-** शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् सार्वजनिकसेवानां सुलभं, पारदर्शकं, समये च वितरणं सुनिश्चित्य सूचनाप्रौद्योगिक्याः प्रभावीप्रयोगे हिमाचलप्रदेशः देशस्य प्रथमक्रमाङ्कस्य राज्यरूपेण उद्भूतः अस्ति। सः अपि अवदत् यत् राज्यस्य दूरस्थेषु आदिवासीक्षेत्रेषु च अधिकांशः सर्वकारीयसेवाः अधुना सङ्गणकमूषकस्य क्लिक् करणेन नागरिकेभ्यः उपलभ्यन्ते, यत् सुशासनं प्रति ऐतिहासिकी उपलब्धिः। मुख्यमन्त्री सोमवासरे सायं हिमाचलप्रदेशे सोसाइटी फॉर प्रमोशन ऑफ आईटी एण्ड ई-गवर्नेन्स इत्यस्य सामान्यसभां सम्बोधयन् आसीत्। सः विभागेन विकसितानां विविधानां सूचनाप्रौद्योगिकी- आधारित- अनुप्रयोगाणां, सॉफ्टवेयरस्य च सम्यक् समीक्षां कृत्वा अधिकारिभ्यः तान् अधिकं नागरिक- अनुकूलं, सुरक्षितं, प्रभावी च कर्तुं निर्देशितवान्।मुख्यमन्त्री राज्यसर्वकारस्य विभिन्नविभागेषु कार्यं कुर्वतां कर्मचारिणां उपस्थितिं सुनिश्चित्य विकसितस्य 'हिम अटेंडेन्स'-अनुप्रयोगस्य सम्यक् समीक्षां कृत्वा तत् अधिकं कार्यक्षमम्, पारदर्शकं, विश्वसनीयं च कर्तुम् आवश्यकपरिष्कारस्य निर्देशं दत्तवान्। सः अवदत् यत् राज्यसर्वकारस्य सर्वेषां कर्मचारिणां हिम् एक्सेस पटलम् इत्यत्र पञ्जीकरणं अनिवार्यं भविष्यति, सर्वेषां सर्वकारीयकर्मचारिणां च एकमासस्य अन्तः अस्मिन् पटले पञ्जीकरणं सुनिश्चितं कर्तव्यं भविष्यति। सम्पत्तिमानचित्रण- अनुप्रयोगस्य प्रारम्भे मुख्यमन्त्री अवदत् यत् एतत् अनुप्रयोगं नागरिकाणां सम्पत्तिविषये सम्पूर्णा अद्यतनसूचनाः प्रदास्यति, येन आधारभूतसंरचनाविकासे, प्रभावीनीतिनिर्माणे, उत्तमसंसाधनप्रबन्धने च सहायता भविष्यति। सुखविन्दरसिंहसुक्खु इत्यनेन उक्तं यत् राजस्वसेवानां उत्तमं शीघ्रं च वितरणं सुनिश्चित्य हिमसेवापटले कृत्रिमबुद्ध्याधारित- प्रपत्रसत्यापन- प्रमाणीकरणप्रणालीं एकीकृत्य क्रियन्ते। इयं प्रणाली राजस्वसेवानां प्रथमस्तरीयपरीक्षारूपेण कार्यं करिष्यति, यत् न केवलं राजस्वाधिकारिणः अपितु नागरिकान् अपि अधिकसुलभं पारदर्शकं च सेवां प्राप्तुं सशक्तं करिष्यति। सम्प्रति राजस्वसेवाप्रक्रियायां बहूनां आवेदनानां हस्तसत्यापनस्य आवश्यकता भवति, येन अधिकारिणां कार्यभारः वर्धते। प्रपत्रेषु लघुदोषाः, यथा अस्पष्टाणि छायाचित्राणि अथवा अशुद्धस्वरूपणम्, अनुप्रयोगानाम् अस्वीकारं जनयति। अस्य परिणामः भवति यत् अधिकारिणः केवलं प्रारम्भिकपरीक्षायां बहुमूल्यं समयं यापयन्ति, येन नागरिकाः कार्यालयेषु बहुवारं गन्तुं बाध्यन्ते। एषा एआई-आधारित-प्रणाली अद्यतन- करणसमये स्वयमेव प्रपत्राणि क्मवीक्षणं करिष्यति, तत्क्षणमेव चिनोति यत् ते स्पष्टाः, समीचीनाः, आवश्यकाः हस्ताक्षराणि वा विवरणानि वा अनुपलब्धाः सन्ति वा इति अपि च, अद्यतनकृतेषु प्रपत्रेषु विवरणेन सह नाम, जन्मतिथिः, आधारसङ्ख्या इत्यादीनां व्यक्तिगतसूचनाः मेलयित्वा यत्किमपि विसंगतिः भवति तस्य परिचयः भविष्यति। यदि किमपि विसंगतिः लभ्यते तर्हि आवेदकाः स्वस्य आवेदनपत्रं दातुं पूर्वं तत्कालं सूचनां प्राप्नुयुः, येन ते तत्क्षणमेव दोषान् सम्यक् कर्तुं समर्थाः भविष्यन्ति। एष उपक्रमः आवेदनप्रक्रियायां नागरिकानां कृते उत्तमम् अनुभवं प्रदास्यति, अनावश्यकं अस्वीकारं च समाप्तं करिष्यति। राजस्वाधिकारिणः प्रशासनिकपरीक्षायाः उत्तरदायित्वात् अपि मुक्ताः भविष्यन्ति, येन ते पात्रतायाः तथ्यस्य च वास्तविकसत्यापनस्य विषये अधिकं ध्यानं दातुं शक्नुवन्ति। एतेन आवेदनानां प्रक्रिया शीघ्रं भविष्यति, अधिकारिणां समीपं गच्छन्तः आवेदनानि अपि अनुमोदनार्थं प्रायः सज्जाः भविष्यन्ति। सः पंचायतस्तरपर्यन्तं पूर्णमानचित्रणं सुनिश्चितं कर्तुं, विविधसामाजिक- आर्थिकदत्तांशं समावेशयितुं, राज्यसर्वकारस्य सर्वासु कल्याणकारीयोजनाभिः सह सम्बध्दयितुं च हिम् परिवार-पोर्टल-इत्यस्य निर्देशं दत्तवान् मुख्यमन्त्री अवदत् यत् अस्मिन् पटले भूमिसम्बद्धानि विवरणा अपि समाविष्टानि भविष्यन्ति, येन योजनानां लाभः लक्षितलाभार्थिभ्यः पारदर्शितरूपेण प्रदातुं शक्यते।

# एचपीएसईबीएल- इत्यत्र डिजिटलपरिष्कारैः राज्यस्य ₹16.83 कोटिरूप्यकाणां रक्षणं भविष्यति- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारेण राज्यविद्युत्मण्डललिमिटेड् (एचपीएसईबीएल) इत्यत्र अनेके डिजिटल- प्रशासनिक- परिष्काराः कार्यान्विताः, येन राज्यसर्वकारस्य व्यवस्थापरिवर्तनस्य प्रतिबद्धता प्रतिबिम्बिता अस्ति। पारदर्शीक्रयणप्रक्रियासु, प्रौद्योगिकीयस्वनिर्भरतां च प्राथमिकताम् अददत् राज्यसर्वकारः न केवलम् उपभोक्तृसेवासु परिष्कारं करोति अपितु वित्तीय-अनुशासनम् अपि उन्नतं करोति। सः अवदत् यत् वर्तमानराज्यसर्वकारस्य उद्देश्यं न केवलं जीर्णव्यवस्थासु परिष्कारः अपि तु तेषाम् अधिककुशलीकरणम् अपि अस्ति।सः अवदत् यत् पारदर्शी क्रयणप्रक्रियाम् अङ्गीकृत्य महत् आउटसोर्सिंग इत्यस्य उपरि निर्भरतां न्यूनीकृत्य एचपीएसईबीएल इत्यस्य विद्युत् बिलिंग उद्यमसंसाधननियोजनं च (ईआरपी) समर्थनसेवासु व्ययः ४६ प्रतिशतं न्यूनीकृतः अस्ति। एतासु सेवासु वार्षिकव्ययः ₹१२.२९ कोटितः ₹६.६८ कोटिपर्यन्तं न्यूनीकृतः अस्ति। एतेषां परिष्काराणां परिणामेण प्रतिवर्षं प्रायः ₹5.61 कोटिरूप्यकाणां प्रत्यक्षरक्षणं भविष्यति, यस्य परिणामेण वर्षत्रयेषु कुललाभः ₹16.83 कोटिरूप्यकाणि भविष्यति। एषा राशिः जनकल्याणकार्येषु आवश्यकसेवासु सुदृढीकरणाय च उपयुज्यते।जीवनसुलभतायाः उपरि बलं दत्त्वा मुख्यमन्त्री अवदत् यत् राज्यसर्वकारेण राज्ये प्रायः २९ लक्षं गृही, औद्योगिकं, वाणिज्यिकं च उपभोक्तृणां लाभं प्राप्तुं उद्देश्यं कृत्वा एचपीएसईबीएल-इत्यस्य डिजिटलीकरणं कृतम्। सः अवदत् यत् नूतनविद्युत्संयोजनानां कृते ऑनलाइन-अनुप्रयोगः, स्मार्टबिलिंग, प्रीपेडसेवाः, ऑनलाइनदेयकप्रदानं, डिजिटल- उपालम्भ- निवारणम् इत्यादीनां सुविधानां कारणात् प्रक्रिया-विलम्बः न्यूनीकृतः, उपभोक्तृणां कृते पारदर्शिता च सुनिश्चिता अभवत्।मुख्यमन्त्री उक्तवान् यत् उपभोक्तृसेवासुदृढां कर्तुं कार्यक्षमतां च वर्धयितुं एचपीएसईबीएल-मध्ये अन्त्यतः अन्तपर्यन्तं डिजिटाइजेशनं कार्यान्वितम् अस्ति। सः अवदत् यत् राज्यसर्वकारः समुच्चय- तकनीकी- वाणिज्यिकहानिः न्यूनीकर्तुं, स्मार्ट- प्रीपेड- मीटरिंगमाध्यमेन समये बिलिंग- राजस्वसंग्रहणं च सुनिश्चित्य, राजस्वहानिं न्यूनीकर्तुं, परिचालनव्ययस्य युक्तियुक्तीकरणे च विशेषं बलं ददाति।



## शैक्षिकभ्रमणार्थं प्रस्थिताः "राज्यस्य बालकाः"

सः अवदत् यत् एतेन भ्रमणेन तेभ्यः ज्ञानं प्राप्तुं विविधविषयान् ज्ञातुं च उत्तमाः अवसराः प्राप्यन्ते। राज्ये एतासु त्रिषु बालसंरक्षणसंस्थासु निवसन्तः आहत्य ५२ बालकाः अस्मिन् भ्रमणकाले भागं गृह्णन्ति। भ्रमणं २०२६ तमस्य वर्षस्य जनवरी-मासस्य १५ दिनाङ्कपर्यन्तं भविष्यति, यस्मिन् काले बालकाः देशस्य विभिन्नानि प्रमुखनगराणि, ऐतिहासिक- सांस्कृतिक- शैक्षिकस्थलानि च गमिष्यन्ति।सुखविन्दरसिंहसुक्खु इत्यनेन उक्तं यत् मुख्यमन्त्री सुख-आश्रययोजनायाः अन्तर्गतं राज्यसर्वकारः एतेषां बालकानां न केवलं रक्षणम् अपि तु उत्तमभविष्यस्य कृते आवश्यकान् अवसरान् अपि प्रददाति। अस्याः यात्रायाः उद्देश्यं बालकानां राष्ट्रियैकतायाः, सांस्कृतिकविरासतां, आधुनिकमूलसंरचनानां, शैक्षिकसंस्थानां च परिचयः करणीयः, येन तेषां सर्वतोमुखविकासः सुनिश्चितः भवति यात्राकार्यक्रमस्य भागत्वेन बालकाः चण्डीगढं, दिल्लीम्, आगरा, गोवा, चण्डीगढं च गमिष्यन्ति। विविधानि आधुनिकयानविधानानि अपि अनुभविष्यन्ति, यथा वोल्वो बसयानानि, वन्देभारत एक्स्प्रेस् रेलयानानि, मेट्रोरेलसेवाः, विमानयात्रा, क्रूज्, हॉप्-ऑन्, हॉप-ऑफ पर्यटनबसयानं च दिल्लीयात्रायाः कालखण्डे बालकाः लालदुर्गं, कुतुबमीनारं, इण्डियागेट, राजघाटं, शक्तिस्थानं, वीरभूमिं, हुमायों समाधिस्थलं, राष्ट्रियप्राणिविज्ञाननिकुञ्जं, राष्ट्रियविज्ञानसङ्ग्रहालयम्, उत्तरखण्डं, दक्षिणखण्डं, भारतीयविश्वकार्याणां परिषदः, त्रिवेणीकलासंगमं, राष्ट्रियप्राकृतिक- इतिहाससङ्ग्रहालयं च द्रक्ष्यन्ति। आगरानगरे ते ताजमहलस्य अपि भ्रमणं करिष्यन्ति। गोवानगरे वाससमये बालकाः कलङ्गुट, फोर्ट अगुआडा, अञ्जुनाबीच, डोना पौला, भारतीय-समुद्रविज्ञान- संस्था, उत्तरगोवायां क्रूजयात्रा च गमिष्यन्ति, दक्षिणगोवायां चर्चं, मङ्गेशीमन्दिरं, वर्कासमुद्रतटं, पणजीनगरं, स्पाइसवाटिकां च गमिष्यन्ति।सुखविन्दरसिंहसुक्खु इत्यनेन उक्तं यत् एतादृशाः शैक्षिकाः अनुभवात्मकाः च यात्राः बालकानां आत्मविश्वासं, जिज्ञासां, देशस्य अवगमनं, सामाजिकचेतना च विकसितुं साहाय्यं करिष्यन्ति। सः अधिकारिभ्यः निर्देशं दत्तवान् यत् बालकानां सुरक्षायां, सुविधायां, परिचर्यायां च कोऽपि प्रमादः न भवति इति सुनिश्चितं कुर्वन्तु।

# Jairam Thakur Birthday Celebration- हर्षोल्लासेन मानितं जयरामठाकुरस्य जन्मदिनम्, नाटीनृत्ये मग्नाः समर्थकाः



**हिमसंस्कृतवार्ताः- शिमला।** राजधानीशिमलानगरे विपक्षनेतुः पूर्वमुख्यमन्त्रिणः जयरामठाकुरस्य ६१तमं जन्मदिनं हर्षोल्लासेन मानितम्। प्रातः १० वादनतः सायं ६ वादनपर्यन्तं तस्य आधिकारिकनिवासस्थानं शुभचिन्तकैः प्लावितम् आसीत्। समर्थकाः ढोलस्य नृत्यस्य च ताडनेन नृत्यं कुर्वन्तः दिवसं यावत् वातावरणं निर्वाहयन्ति स्म। जयरामठाकुरः स्वपरिवारेण सह जाखुमन्दिरे प्रार्थनाभिः स्वजन्मदिनस्य आरम्भं कृतवान्। तस्य आधिकारिकनिवासस्थानं प्राप्ते तत्र पूर्वमेव उपस्थिताः दलकार्यकर्तारः समर्थकाः च मालाभिः स्वागतं कृतवन्तः।विभिन्नजनपदेभ्यः समर्थकाः स्वस्वक्षेत्रेभ्यः नृत्यं, ढोलकं, पारम्परिकवेषं च गृहीत्वा आगतवन्तः, येन हिमाचलीवातावरणं निर्मितम्। जन्मदिनस्य उत्सवे २०२७ तमस्य वर्षस्य विधानसभानिर्वाचनस्य अपि प्रतिध्वनिः अभवत्। नामपत्रार्थिनः जनसमूहं सङ्गृह्य स्वशक्तिं प्रदर्शयितुं प्रयतन्ते स्म। आगामिनिर्वाचने ते प्रबलाः पक्षकाराः इति सन्देशं प्रसारयितुं प्रयतमानाः बहवः नेतारः कार्यकर्तारश्च समर्थकैः सह आगताः। राजनैतिकवृत्तेषु एतत् आगामिनिर्वाचनरणनीत्या सह सम्बद्धं

## मन्त्री जगतसिंहनेगी मतभेदं त्यक्त्वा जयरामठाकुरस्य अभिनन्दनार्थं तस्य गृहं प्राप्तवान्

जयरामठाकुरस्य मन्त्रिमण्डलमन्त्री जगतसिंहनेगिनः मध्ये ये मतभेदाः किञ्चित्कालं यावत् उत्पन्नाः आसन्, तेषां समाधानमपि मंगलवासरे अभवत्। मंगलवासरे प्रातःकाले कैबिनेटमन्त्री जगतसिंहनेगी जयरामठाकुरस्य गृहं गत्वा तस्मै जन्मदिनस्य शुभकामनाम् अयच्छत्। तयोः एकं चलचित्रं सामाजिकमाध्यमेषु प्रसृतम् अभवत्।

## मुख्यमन्त्री, उपमुख्यमन्त्री, मन्त्री विक्रमादित्यः च सामाजिकमाध्यमेन शुभकामनाः अयच्छन्

मुख्यमंत्री सुखविंदरसिंहसुक्खुः, उपमुख्यमन्त्री मुकेश अग्निहोत्री, लोक निर्माणमंत्री विक्रमादित्यसिंहश्च सामाजिकमाध्यमेन नेताप्रतिपक्षाय जयरामठाकुराय शुभकामनासन्देशान् अयच्छन्। पूर्वकेन्द्रीयमन्त्री, भाजपा सांसदश्च अनुरागसिंहठाकुरः अपि जयरामठाकुराय जन्मदिनस्य शुभकामनाम् अयच्छत्। तत्रैव विधायकः सुखरामचौधरी, बलबीरवर्मा, विनोदकुमारः, दीपराजः, लोकेन्द्रकुमारः, रीनाकश्यप, पूर्णचंद्रठाकुरः, इन्द्रसिंहगांधी, जनकराजः, दलीपठाकुरः, आशीषशर्मा, पूर्वविधायकः सुरेशभारद्वाजः, रविठाकुरः, के. एल. ठाकुरः, लखविंदरराणा, परमजीत पम्मी, अर्जुनठाकुरः, बलदेवतोमरः, हीरालालः, भाजपादलस्य अधिकारिणः, कार्यकर्तारः च जयरामठाकुरस्य आवासं गत्वा शुभकामनाः अयच्छन्।

## जयरामठाकुरः प्रधानमंत्रिणः दलस्य कार्यकर्तॄणां च कृतज्ञतां प्रकटितवान्

जयरामठाकुरः सर्वेषां हार्दां कृतज्ञतां प्रकटितवान्, जनानां कृते एषः विश्वासः, स्नेहः च तस्य महती सम्पत्तिः इति उक्तवान्। सः राज्यस्य जनान् आश्वासितवान् यत् सः अन्तिमश्वासपर्यन्तं राज्यस्य देशस्य च सेवायां, सामान्यजनहिताय च समर्पितः भविष्यति। जयरामठाकुरः उक्तवान् यत् प्रधानमंत्रिणः नरेन्द्रमोदिनः आशीर्वादेन सः राज्यस्य सेवां निरन्तरं करिष्यति।

# समाजस्य परिवर्तनं करणीयं चेत् स्वस्य परिवर्तनम् आवश्यकम् - आचार्यः सत्यदेवः




**हिमसंस्कृतवार्ताः- सरोज शर्मा, अम्बेहड़ा, ऊना।**
संस्कृतभारती हिमाचलप्रदेश न्यासद्वारा प्रदेशे षड् स्थानेषु प्रबोधनवर्गाः आयोज्यन्ते। अस्मिन् क्रमे ऊना मण्डलस्य अम्बेहड़ास्थे श्री सुंदरनारायणगुरुकुले आयोज्यमानस्य बिलासपुरविभागस्य प्रबोधनवर्गस्य षट्तमे दिवसे आचार्यः सत्यदेवः सत्रस्वीकर्ता आसीत्। सत्रस्यास्य विषयः 'कार्यस्थाने कार्यवर्धनम्' इति आसीत्। महोदयेनोक्तं यत्- यदि वयं समाजे किमपि परिवर्तनम् इच्छामस्तर्हि सर्वप्रथमं स्वस्य परिवर्तनं परिष्कारश्च परमावश्यकम्। शिविरात् अनन्तरं साप्ताहिकं मेलनं परमावश्यकम्। स्वकीये शिविचालनमपि करणीयम्। कार्यवर्धनाय अधिकाधिकाः प्रचारोपायाः चिन्तनीयाः। सम्प्रति अन्तर्जालस्य युगः। सामाजिकमाध्यमाः प्रचारस्य सरलोपायाः। अस्माकं कार्यस्य विवरणं यदा सामाजिकमाध्यमेषु गच्छति तदा तस्य प्रचारः स्वयमेव भवति। संघटनशक्तिद्वारा वयं स्वकीयं कार्यं वर्धयितुं शक्नुमः। अस्माकं कार्यं निरन्तरं भवेत्। संघटनस्य कृते निरन्तरता आवश्यकी भवति।
ध्यातव्यमस्ति यत् वर्गेऽस्मिन् आहत्य सप्तचत्वारिंशत् (५७) छात्राः सन्ति ये ऊना- हमीरपुर- बिलासपुरस्थानां संस्कृतमहाविद्यालयानां छात्राः सन्ति। अयं वर्गः जनवरीमासस्य प्रथमदिनांकादारभ्य दशदिनांकपर्यन्तमस्ति।

## लौकिकन्यायकोशः*" (३७३)

## " *कीटोद्धारन्यायः*"

प्रवाहे निमज्जन्तं कीटविशेषं कोऽपि उद्धृत्य बहिः स्थापयति चेदपि सः कीटः झटिति समीपे वर्तमानं कमपि अपरम् आधारं प्राप्य स्वात्मानं रक्षितुं स्वयं प्रयत्नं करोति । तथा कथञ्चिदपि स्वप्राणान् रक्षितुं प्रयतमानस्य विषये अयं न्यायः प्रवर्तते ।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन इंडोनेशियाराष्ट्रस्य बलीप्रान्तस्य द्वीपान्तर-संस्कृतप्रतिष्ठानस्य मार्कण्डेयगुरुकुले संस्कृताध्ययनकार्यक्रमाङ्गतया संस्कृताध्ययनकेन्द्रं समुद्घाटितम्



**हिमसंस्कृतवार्ताः- आचार्यः विशालप्रसादभट्टः, बाली, इंडोनेशिया।**
जनवरी पञ्चमे दिनाङ्के 2026 तमे दिनाङ्के, सोमवासरे, भारतस्य नवदेहलीस्थस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन इंडोनेशियाराष्ट्रस्य बलीप्रान्तस्य द्वीपान्तरसंस्कृतप्रतिष्ठानस्य मार्कण्डेयगुरुकुले संस्कृताध्ययनकार्यक्रमाङ्गतया संस्कृताध्ययनकेन्द्रं समुद्घाटितम्। गुरुकुलच्छात्रैः वैदिकमन्त्रोच्चारणपुरस्सरं सरस्वतीवन्दनया ध्येयमन्त्रेण च कार्यक्रमस्यास्य शुभारम्भो विहितः। तदनु बाली, लोम्बोक, जावा, इत्यादीनां द्वीपानां संयोजकः सुयशमहोदयः समागतातिथीनां परिचयपुरस्सरं संस्कृतपुस्तकसमर्पणेन स्मृतिचिह्नप्रदानेन स्वागतं व्याहरत्। प्रास्ताविकोद्बोधने तेनोक्तं यत् गतनवेम्बरमासे संस्कृतभारत्याः अखिलभारतीयाधिवेशनावसरे –केन्द्रीयसंस्कृतविश्वविद्यालयस्य यशस्विनां मान्यमान्यानां कुलपतिवर्याणाम् आचार्याणां श्रीनिवासवरखेडिमहाभागानां कुशलमार्गदर्शने मुक्तस्वाध्यायपीठस्य मान्यानां निदेशकवर्याणाम् आचार्यरत्नमोहनझामहोदयानां, द्वीपान्तरसंस्कृतप्रतिष्ठानस्य न्यासिनां सुमेशसोमवर्याणाम् अध्यक्षाणाम् इ मदे धनञ्जयवर्याणां सन्निधौ उभयोर्संस्थयोः परस्परं सहमतिपत्रं (MOU) हस्ताक्षरितमभूत्। एतत्संस्कृताध्ययनकेन्द्रस्य समुद्घाटनेन इंडोनेशिया- भारतयोर्मध्ये- पूर्ववत् संस्कृतसंस्कृत्योः दृढसम्बन्धः पुनर्स्थापितो भवेदिति आशास्महे। कार्यक्रमस्यास्य समुद्घाटकः मुख्यातिथिः बाली- भारतीय- प्रधानवाणिज्य- दूतावासस्य CGI (Consulate General of India, Bali) महावाणिज्यदूतः CG (Consul General) माननीयः डॉ. शशाङ्कविक्रममहाभागः कम्पुल् इति विशेषवाद्यं त्रिवारं नादयित्वा कार्यक्रमं समुद्घाट्य प्राभाषत यत् इंडोनेशिया- भारतदेशयोर्मध्ये सहस्रवर्षेभ्यः संस्कृतसंस्कृतिसम्बन्धः वर्तते, एवञ्च उभयोर्राष्ट्रयोर्मध्ये बहुकालात् परस्परं ज्ञानस्य आदनप्रदानमासीत्। तेनोक्तं यत् भवन्तः संस्कृताध्ययनकेन्द्रमाध्यमेन संस्कृतभाषाध्ययनं विधाय अग्रे योगायुर्वेद- भगवद्गीता- रामायण- महाभारतादीनां संस्कृतग्रन्थानां च गभीराध्ययनं कर्तुं समर्थाः भविष्यन्ति। तदनन्तरं कार्यक्रमस्य विशिष्टातिथिः भारतीयसांस्कृतिकसम्बन्ध-परिषदः Indian Council for Cultural Relations) बालीस्थ- स्वामिविवेकानन्द-केन्द्रनिदेशकः (SVCC BALI) नवीनमेघवालमहोदयः आशंसाभाषणे प्रोक्तवान् यत् न केवलं मानवजीवनस्य सर्वाङ्गीणविकासाय अपि तु निखिलस्यापि प्रपञ्चस्य मानवानां सर्वाभ्युदयाय च संस्कृताध्ययनं परमावश्यकम्। संस्कृताध्ययनेन मानवेषु दुष्टप्रकृतेः निवारणं भवति सद्प्रवृत्तीनाञ्च सम्वर्धनं जायते। अतः सम्प्रति ये जनाः संस्कृतेन सम्भाषणं कुर्वन्ति संस्कृतं च पठन्ति तेषां वस्तुतः महद्भागधेयं वर्तते। तदनन्तरं वर्गसंयोजकः माणिक आस्तवमहोदयः उत्तराखण्डतः समुपागतस्य केन्द्रीय- संस्कृत-विश्वविद्यालयस्य मुक्तस्वाध्यायपीठस्य संस्कृताध्ययनकेन्द्रशिक्षकस्य आचार्यविशाल-प्रसादभट्टमहोदस्य डॉ. एच. एस. सुदर्शनमहोदयः शसुधामहोदयः परिचयं कारयित्वा अन्ते सामाजिकजनानां कृते 06.01.2025 दिनाङ्कतः आयोजयिष्यमाणस्य द्वादशदिनात्मकस्य संस्कृतसम्भाषणशिबिरस्य सूचनाः दत्तवान्।
कार्यक्रमस्य सञ्चालनं गुरुकुलछात्रौ संस्कृतांङ्लभाषया पुतु धिता दिव नातालिच, इ गेदे फाजर कृष्णा पुत्रः च अकुरुताम्। अवसरेऽस्मिन् संस्कृतभारत्याः कार्यकर्ता डॉ. एच. एस. सुदर्शनमहोदयः, सुधीसुब्रह्मण्यमहोदयश्च द्वीपान्तरसंस्कृतप्रतिष्ठानस्य कार्यकर्तारः, गुरुकुलच्छात्राः, बालीद्वीपस्थाश्च अनेके सामाजिकजनाः समुपस्थिताः अभवन्।

## वार्ता-संवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य जपान-देशात् एका विचित्रा वार्ता आगता। तत्र एकेन द्वादश-वर्षीय-बालकेन 'सङ्गणकीय-क्रीडा' क्षेत्रे वृत्तिं रचयितुं विद्यालय-त्यागः कृतः। तेन उक्तं यत् सः अधुना न पठिष्यति अपि तु क्रीडिष्यति एव।
**नन्दिनी-** अहो! बालकेन तु दुःसाहसं कृतम्। अधुना मुम्बा-पुर्याः वार्ता श्रूयताम्। तत्र विमान-पत्तने मुख-अभिज्ञान-यन्त्रेण महती त्रुटिः कृता। तेन यन्त्रेण द्वौ यमल-भ्रातरौ एकः एव जनः इति मतम्। यदा तयोः मुखाकृतिः समाना भूता, तदा यन्त्रं भ्रान्तं जातम्।
**काव्या-** यन्त्राणि अपि कदाचित् भ्रान्तानि भवन्ति। इदानीं एका सुखावहा वार्ता अस्ति। दुबई-नगरे एकेन भारतीय-वाहन-चालकेन चतुर्विंशति-लक्ष-रूप्यकाणि जितानि। तेन द्विवर्षं यावत् गुटिकापात-चीटिका क्रीता। अन्ते तस्य भाग्यं फलितम्।
**नन्दिनी-** भाग्यं तु बलवत् एव। अधुना आफ्रिका-देशस्य विस्मयकरीं घटनां शृणु। तत्र एकेन अन्तर्जाल-प्रसिद्धेन युवकेन चित्रकायेन सह धावन-स्पर्धा कृता। तेन वन-पशुना सह वेगेन धावितम्। एतत् दृष्ट्वा जनाः विस्मिताः जाताः।
**नन्दिनी-** अस्तु, अद्यतन-वार्ता-समयः समाप्तः।
**काव्या-** श्वः पुनः नूतन-वार्ताभिः सह आगमिष्यावः। तावत् नमो नमः।

## हास्यकणिका -

### माता-पतिपतन्योः मध्ये हासपरिहासम्

*पत्नी* - स्वस्य पूर्व-प्रेयस्याः विषये कामपि सम्यक् वार्तां वदतु।
*पतिः* - मम पूर्व-प्रेयसी अतीव भोजनप्रिया आसीत्। 🥳
*माता* - अतएव तव सुखं भक्षितवती।
पत्नी माता च 😃 😃 😄 😁
पतिः 😳 😳 😳 😳 😳




### हास्यकणिका -
### *पिता-शिशुः-संवादः*

पिता - "पितरं" आङ्ग्लभाषायां किं कथ्यते?
शिशुः : Father! (फ़ादर)
पिता - "मातरम्" इति किं कथ्यते?
शिशुः: Mother! (मदर!)
पिता - तर्हि "पितृव्यम्" इति किं कथ्यते?
शिशुः - Chaadar! (चादर!) 🤣 🤩